**Gyanshauryam, International Scientific Refereed Research Journal**
Available online at : **www.gisrrj.com**
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 6 | ISSN : 2582-0095

# शिक्षायां संस्कृतभाषाधिगमे तथा लेखनकौशलविकासे मनोवैज्ञानिककारकाणां प्रभाव:

**Chinmaya Mishra**
Research Scholar, National Sanskrit University, Tirupati

**Article Info**
Volume 6, Issue 6

**Page Number :** 05-10

**Publication Issue :**
November-December-2023

**Article History**
Accepted : 01 Nov 2023
Published : 20 Nov 2023

**शोधसारांश:-** भाषाधिगमे प्रधानकारणानि तावत् सामाजिकमनोवैज्ञानिककारकाणि भवन्ति। यत: तदानीन्तकाले सा भाषा जनभाषा वर्तते स्म। प्रतिगृहं प्रतिजनमपि तया भाषया एव जल्पन्ति स्म, न तथाधुना। यत: काले काले सामाजिककारकेषु परिवर्तनं समजनि। एवमेव यान्त्रिककालेऽस्मिन् धर्मार्थकाममोक्षेषु अर्थदृष्ट्या कामदृष्ट्या च समाजस्य वैज्ञानिकदृक्पथमपि सुपरिवर्तनं जायते स्म। तेन कारणेन संस्कृतभाषाया: अभ्यासे सर्वेषामभिवृत्ति, अभिरुच्यादिषु मनोवैज्ञानिककारकेषु अपि आधुनिककाले परिवर्तनं सन्दृश्यते। इत्यत: यस्या: कस्या: अपि भाषाया: अधिगमे प्रधानकारकाणि काले काले परिवर्तितानि भवन्ति इति सुज्ञायते। वर्तमानकाले अतिमूल्ययुक्ताया: वैज्ञानिकविषयान्तर्गर्भिताया: संस्कृतभाषाया: परिपोषणे परिरक्षणे तस्या भाषाया: अभिज्ञानमत्यावश्यकं वर्तते। तादृश भाषा–अभिवृध्यै मनोवैज्ञानिककारकाणि अति महत्त्वपूर्णाणि भवन्ति।

मुख्यशब्दा:– शिक्षा, संस्कृतभाषा, अधिगम:, लेखनकौशलविकास:, मनोवैज्ञानिककारक:, प्रभाव:

**उपोद्धोत: –** "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । इति श्रीमद्भगवद्गीतानुसारं ज्ञानमेव मानवीयं कलेवरं देवत्वं प्रापयति। ज्ञानं मानवस्य तृतीयनेत्रं वर्तते। विद्यया शिक्षया च ज्ञानमुत्पद्यते। सा शिक्षा, सा विद्या च आवश्यकी या मुक्तिं प्रददाति। शिक्षा मानवजीवनस्याभिन्नमङ्गं वर्तते। शिक्षाया एव मानवा:सभ्यतां सुशीलतां व्यवहारम्, आहारं ,ज्ञानविज्ञानं, कर्माकर्मं , धर्माधर्मं, सत्यासत्यं , वाद्यामविद्यां च वेन्ति। शिक्षां विना गत्यन्तरं नास्ति। शिक्षाया: विद्यया ज्ञानेन वा य: प्रकाश: ज्ञानं नेतृत्वञ्च प्रोच्यन्तेऽस्माभि: तेन अस्माकं पूर्णां रूपान्तरं जायते।

शिक्षायामपि पुन: भाषा, गणितम्, कला, साहित्यम्, विज्ञानम्, अर्थशास्त्रम्, समाज– शास्त्रम्, इतिहास:, वैद्यकीयशास्त्रम् प्रविधिशास्त्रम्, दर्शनम् इत्यादय: अनेके प्रधानविषया: सन्ति। प्रकृतमनुसन्धानं भाषाविषयकं भवति। भाषा अपि नैका विलसन्ति लोके। यया – संस्कृतम्, हिन्दी, आङ्गलम्, कन्नडम्, तेलगु, मराठी, तामिल, ओरिया, बाङ्गला इत्यादय:। वस्तुत: संस्कृतभाषा भारतीयानां जीवनस्य अस्ति। संस्कृतभाषामन्तरा काऽपि भाषा न केवलं समृद्धा भवति अपि तु जीवितुमेव न शक्नुयात्। तथा संस्कृतभाषां विना कोऽपि भारतीयो यथार्थभारतीयो भवितुं न अर्हति। यदि कश्चन जन: भारतीसंस्कृतिं प्रति श्रद्धां, राष्ट्रियैकतां प्रतिनिष्ठां च प्रदर्शयति, तर्हि संस्कृते उपेक्षाभावं दर्शयितुं न प्रभवति। केचन एवं

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

चिन्तयन्ति, यथा भारते संस्कृतं, तथा पश्चिमदेशेषु ग्रीक्, लाटिन् भाषे स्तः। संस्कृतं तथा नास्ति, अद्यापि देशे सर्वत्र प्रचलन्ती अस्ति, छात्राः पठन्ति, सभासु उपयुज्यते। काव्यानि लिखन्ति। पण्डितानां माध्यमभाषारूपेण संस्कृतमेव अस्ति। वस्तुनः प्रपञ्चे

विद्यमानेषु सर्वेषु प्राणिषु मानवा एव स्वविवेकबलेन श्रेष्ठः। प्राकृतः मानवः सुखलोलुपतया सुखदुःखयो अनुभवेन सुखमेव कामयन् विकासपरम्परायां सामुहिकजीवनस्य वैज्ञानिकाविष्कृतीनां च अन्वेषणामकरोत्। सर्वत्र प्रकृतेः सम्पादाम् उपयोगेन सुखमयं जीवनं यापयितुमात्मनः सन्ततेः अनुचराणां च कृते सुखं प्रापयितुं प्रापतत। विकासपरम्परायां पाषाणयुगात् अणुयुगपर्यन्तं मानवेन या यात्रा कृता तत्र तस्य बुद्धिः, बुद्धिबलेन प्राप्नानुभवः, अनुभवैः सञ्जातः चेतनस्वरुपः एव प्रधानः। अयम् अनुभवः क्वचित् भिन्नः क्वचित् एकरुपः। अधिगमो यद्यपि प्राप्नानुभवानां सञ्चयः क्रियारुपस्तथापि अनुभवो वा अधिगमः। भाषाधिगमे वर्णपदवाक्यानां क्रमेण अधिगमः जायते। अपि च अधिगमः सुकरश्च भवति। तथैव संस्कृतभाषाधिगमेऽपि वर्णपदवाक्यानां सम्यक् अधिगमे एव संस्कृतभाषाधिगमो भवति।

अत्र प्रधानकारकाणानि तावत् मनेवैज्ञानिककारकाणि भवन्ति। यतः ददानीन्तकाले सा भाषा जनभाषा वर्तते स्म। प्रतिगृहं प्रतिजनमपि तया भाषया एव जल्पन्ति स्म, न तथाधुना। संस्कृतभाषायाः अभ्यासे सर्वेषामभिवृत्ति, अभिरुच्यादिषु मनेवैज्ञानिककारकेषु अपि भाषायाः अधिगमे प्रधानकारकाणि काले काले परिवर्तिनानि भवन्ति इति। वर्तमानकाले अतिमूल्ययुक्तायाः वैज्ञानिकविषयान्तर्गर्भितायाः संस्कृतभाषायाः परिपोषणे परिरक्षणे तस्याः शब्दभाण्डारस्य अभिज्ञानमत्यावश्यकं वर्तते। तादृश शब्दभाण्डारस्य अभिवृध्यै मनेवैज्ञानिककारकाणि अति महत्त्वपूर्णाणि भवन्ति।

**1.भाषा –** जगदारम्भकालादेव सदा चोष्टारतः मनुष्यः स्वभावनायाः परिप्रकाशार्थं शतप्रयासम् अकरोत्। बालात् आरभ्य वृद्धं यावत् सर्वेषां जनानां भावना हृदि विद्यते। प्रतिक्षणे प्रतिमुहूर्ते च भावनायाः सृष्टिर्जायते। मनसि जायमानानां भावावेगानां प्रकटीकरणाय परस्परभावविनिमयाय च सरला, स्पष्टा, मुख्या च या माध्यमी लब्धा सा भवति "भाषा"। यस्याः आधारेण इतरप्राणिनामपेक्षया दिने दिने निरन्तरं परिवर्द्धमानः दृश्यते मानवाः। मानवविकासस्य मूलाधारः "भाषा" इति। मानवानां सर्वेऽपि व्यवहाराः भाषया एव सम्पद्यन्ते। सार्थकः व्यवहारः न स्यात् विना भाषाज्ञानम्। मानवीयक्रियाणां भित्तिः भाषामुपजीवति तथा भाषा एकः संस्कारविशेषः येन पारिवारिकसामाजिकपरिवेशे सहजता आयाति।

भाषा नाम येन मनुष्याः न केवलं भावाभिव्यक्तिं कुर्वन्ति, अपि तु भावस्यादानप्रदानमपि कुर्वन्ति। विना भाषां सम्पूर्ण जगदिदम् अन्धकारमयं भवति। भाषा नाम व्यक्ता वाक्। भावभिव्यक्तये प्रयुक्तानां सार्थकशब्दानां समष्टिरेव भाषाशब्देन व्यवह्यते। मनोभावव्यञ्जिका वर्णात्मिका भवति भाषा। भाष्यते इति भाषा। भाषा विचाराणां प्रकटनस्य माध्यमः भवति।

**2.संस्कृतभाषा –** सम्यक् कृतं संस्कृतम्। संस्कृतम् इति पदं सम् पूर्वक डुकृञ्धातोः कर्मणि क्तप्रत्यये कृते सति "सम्परिभ्यां करोतौ भूषणे" इति सुडागमः ।ततः संस्कृतम् इति सिद्धम् । या भाषा संस्कृत- अपरिमार्जिता परिशुद्धापरिपूर्णा अलङ्कारभूता च भवति, सा संस्कृतभाषा इत्युच्यते। संस्कृत- भाषायांपाणिनेःमतेन[३क] वर्णाःसन्ति । तेचस्वराः[२], व्यञ्जनानि[३], अयोगवाहाः [ॢ] स्वराणां ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितानुनासिकाननुनासिकाः इति नैके भेदाः जायन्ते । अस्यां भाषायामपेक्षिताध्वनयः सन्ति ।तेन भाषाभावाभिव्यक्तौ सर्वथा समर्था विद्यते । अत्र त्रीणि वचनानि, त्रीणि लिङ्गानि, त्रयः पुरुषाः सन्ति ।एवं रूपेण संस्कृतभाषायाः व्याकरण -नियमाः बहवः सन्ति।

नानाभाषाभाषिजनाश्रयेऽस्मिन् लोके सहस्राधिका भाषा विलसन्ति। यथा - संस्कृतम्, आङ्ग्लम्, हिन्दी, चीनी, फ्रेञ्च, जापानिज इत्यादयः। एतासां भाषाणां प्रकृत्यनुसारं कैश्चन वर्गैः एताः व्यभज्यन्त। तत्र प्रामुख्येन भारोपीयभाषापरिवारः शतंवर्गकेण्टुवर्गाभ्यां द्विधा विभाजितः वर्तते। केण्टुमिति वर्गे युरोपीयाणां भाषाणां ग्रहणं वर्तते। शतंवर्गे आर्यायणीयाः भारतीयाः भाषाः गृहीता भवन्ति इति पण्डितमण्डितम्। तत्र भारतीयाः भाषाः संस्कृतम्, हिन्दी, कन्नडम्, मराठी, तेलेगु,

ओडिया बाङ्गला इत्यादयः वर्तन्ते। तर्हि शतंवर्गे विद्यमानासु एतासु सर्वासु भाषासु इयं भाषा संस्कृतं नाम मूर्धन्यं स्थानमावहति।

या परिष्कृता, परिपक्वा, परिशुद्धा, दोषपरिमार्जिता, व्याकरणादिनियमबद्धा, विपुलशब्दभण्डारोपेता, परिपूर्णालङ्कारभूता भवति सा संस्कृतभाषेत्यर्थः। भारतीयसभ्यता संस्कृतिश्च संस्कृताधारिता वर्तते। भारतीयदर्शनस्य धर्मस्यापि मूलं संस्कृतमेव। संस्कृतं भवति आर्यभाषाणां जननी, आर्योत्तरभाषाणां पोषकस्वरूपा। भारतवर्षस्य समग्रप्राचीनवाङ्मयं संस्कृतभाषामाश्रित्य एव तिष्ठति। निखिलोऽयं वैदिकवाङ्मयं रामायणं, महाभारतं, पुराणानि, स्मृतिग्रन्थाः, दर्शनानि, धर्मग्रन्थाः, महाकाव्यानि, नाटकानि, काव्यानि, आख्यानसाहित्यं, नीतिकथादयः अस्यां भाषायामेव समुपलभ्यन्ते। ज्ञानस्य विज्ञानस्य न तादृशं किमपि अङ्गमस्ति यन्नोपलभ्यन्ते संस्कृतभाषायाम्। शास्त्रे उच्यते यत् – **"यदस्ति संस्कृते तदस्ति अन्यत्र, यन्नास्ति संस्कृते तन्नास्ति अन्यत्र"** इति। तदर्थमेव महाभारते उच्यते–

**धर्मे चार्थे चकामे च मोक्षे च भरतर्षभ।**

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित।।**

प्राचीनकाले संस्कृतभाषा न केवलं साहित्यिकी भाषा आसीत् अपि तु साधारणजनानां व्यवहारिकी भाषा आसीत्।

प्राचीनकाले उत्पन्नाः स्थानीयभाषाः संस्कृतभाषायाः साहित्येन च अत्यन्तं प्रभाविताः अभवन। पाणिन्यादयो महर्षयः सूत्रसाहित्यस्य प्रणयनमकुर्वन। धर्मस्य संरक्षणेन, प्रोस्ताहनेन च संस्कृतं देवभाषापदमलभत। प्राचीनशिलालेखेषु संस्कृतस्य उपलभ्यमानत्वात् अस्याः प्राचीनत्वं, राजकीयता, व्यावहारिकत्वञ्च प्रमाणितं भवति। संस्कृतभाषेयं देववाणी सुरभारती इति नाम्ना सर्वत्र प्रशंस्यते ज्ञायते च। विश्वस्य सर्वासु भाषासु भाषेयं सर्वप्राचीना, सर्वासां भाषाणां जननीत्वेन चेयं संपूजिता। ब्रह्मणः मुखारविन्दात् निःसृता वेदमयी वाक् इति एषा प्रख्यता। यथोक्तम्–

**अनादिनिधिना नित्या वागुत्सृष्टा स्वयंभुवा।**

**आदौ वेदमयी दिव्या ततः सर्वाः प्रवृत्तयः।। इति। ( म. भा. शान्ति - 232.46)**

इदृशी इयं भाषा मानवस्भताया: जीवन्तप्रतीकत्वेन अवर्तते, विद्यते, भविष्यति च। विश्वस्य प्राचीनतमा भाषा भारतस्य अमुल्य निधिश्च भवति।

**3.अधिगमः** - अधिगमो नाम अनुभवेन, अभ्यासेन, प्रशिक्षणेन वा जीवव्यवहारे जायमानं शाश्वतिकं सापेक्षिकं परिवर्तनं बोभूयते। अधिगमः सर्वेषां मानवानां स्वाभाविकप्रक्रिया इति मन्यते। जन्मत आरभ्य मृत्युं यावत् सः अधिगच्छत्येव। सर्वप्रथमं परिवारमाध्यमेन सः अनेकविधिकार्याणि कर्तुमवगच्छति परिवार एव तस्य प्रथमपाठशाला इति मन्यते। परन्तु परिवारे तस्य अभिभावकैः यद् यद् पाठ्यते तेन तददेव आचर्यते। तत्पाश्चात् सः विद्यालयरुपौलघुसमाजे प्रविशति, यत्र सर्वैः छात्रैः सह मिलित्वा निश्चितोद्देश्यपूर्त्यर्थं कार्यरतो भवति। सामाजिकतायाः परिवेशः अत्र द्रष्टुं शक्यते। तत्पश्चात् सः समाजे प्रविश्य राष्ट्रियान्ताराष्ट्रियस्तरानुकूलव्यवहाराध्ययनं कर्तुं क्षमतां प्राप्नोति। सः यादृशं व्यवहारं समाजेन सह आधरति च तादृश एव व्यवहारः समाजेन प्रतिविन्दयते।

ज्ञानस्य,कौशलानाम्, अभिवृत्तीनाम् आचाराणाञ्च प्राप्तिरप्यधिगमः निगद्यते। नूतनपरिवेषे सामञ्जस्यप्रक्रियामि अधिगमः इत्युच्यते। प्रक्रियेयम् आजीवनं ( जन्मतः मरणपर्यन्तं) निरन्तरं प्रचलति। इमाम् अधिगमप्रक्रियाम् अनुभवः परिपक्वता च अत्यन्तं प्रभावयतः। यथा – लघुबालः दीपं दृष्ट्वा हस्तेन त ग्रहीतुं प्रयतते, तस्य हस्तः ज्वलति तथा पीडामनुभवति। अनेन अनुभवेन सः भविष्ये न कदापि दीपं स्पृशति।

अधिगम: सर्वजीवसाधारण: धर्म:।अत: समाजे सर्वस्मिन् क्षेत्रे प्राप्तुं शक्यते। एवम्प्रकारेण अस्य स्थानमतीव महत्त्वपूर्ण प्रतिभाति मानवजीवने। क्रियेयं सर्वेषु मानवेषु भवत्येवष। परमस्या: सञ्चरणव्यवस्था महत्त्वपूर्णा भवेत्। यत: अस्या: सञ्चरणस्योचिता व्यवस्था यदि न भविष्यति तर्हि अधिगन्तुं योग्यविषयं कदाचिन्न धारयेत्। अत: शिक्षाशास्त्रिण: अस्या: प्रक्रियाया: सम्यक् सञ्चरणार्थ विविधान् शिक्षणविधीन् प्रत्यपादिषु। तै: शिक्षणविधिभि: उत्तमशिक्षणं प्रदातुं शक्यते। उत्तमसम्प्रेषणञ्च सम्भवति। तत: अधिगम: निष्पद्यते। अत: वस्तुत: मानव: स्वजन्मजातंप्रवृत्त्या साह्येन वर्तमानवातावरणेन सह समायोजनं संस्थापयितुं किमप्यध्ययनं करोति स एव समायोजनप्रक्रिया तत्त्वं वा भवत्यधिगम: इति।

**4.संस्कृतभाषाधिगम:–**भाषाधिगमे त्रय: घटका: सन्ति। वक्ता, भाषा, श्रोता च। वक्ता तस्यां भाषायां निपुण: भवति। अथवा भाषाया: स्वरूपं प्रयोगं च सम्पक् जानाति। वक्ता अर्थ मनसि निधाय तमर्थं बोधयितुं ततन्निश्चितार्थबोधकशब्दं तदुच्चारणानि नियमगतियतिलयपुरस्सरमुच्चारयति। उच्चारितध्वनिरूपा: वर्णा: क्रमेण श्रोतु: श्रवणविवरे प्रविशन्ति। श्रवणेन गृहीत क्रमबद्धा: वर्णा: पदरूपा:, वाक्यानि वा वुद्धौ वर्तमानान् स्फोटरूपशब्दान् जागरयन्ति। विपुलवाङ्मयविस्तारे भाषानिर्माणसौन्दर्ये अतिसूक्ष्मभावानां स्पष्टीकरणे संस्कृतं विना न काप्यन्या भाषा समर्था भवितुमर्हति। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वञ्चास्यां निबद्धमस्ति। तर्हि अस्यां विद्यमानसमग्रतत्त्वस्याधिगम: केनोपायेन शक्य इति जिज्ञासायां स्थूलरुपेण वाङ्मयस्यास्य संस्कृतस्य विभाग: चिकीर्ष्यते। यथा –

क. वैदिकविभाग:

ख. शास्त्रविभाग:

ग. लौकिकविभाग:

घ. ज्ञानविभाग:

ङ. विज्ञानविभागश्च।

त्वरितभाषाधिगमार्थ वक्ता, श्रोता च भाषाभिज्ञो स्याताम्। यदि श्रोता सर्वथा भाषया अपरिचित: तर्हि तस्य शब्दार्थबोधो झटिति न भवति।

जातस्य शिशो: आदौ माता एव वर्णोच्चारणं शिक्षयति। तत: परं गुरुकुले गुरो: सन्निधौ क्रमेण वर्णपदवाक्यानां ज्ञानमधिगच्छन्ति। यद्यपि अद्यत्वे लोकव्यवहारे भूरिश: संस्कृतव्यवहारो न दरीदृश्यते। परन्तु संस्कृतशब्दानां संस्कृतवचनानां तु सर्वासु भारतीयभाषासु क्वचित् पाश्चात्त्यभाषासु अपि स्पष्टतया प्रयोग: परिलक्ष्यते। अत: एतादृशजनानां कृते संस्कृतभाषा सर्वथाऽपरिचिता न भवति अल्पेन प्रयत्नेन ते शीघ्रं ज्ञातुमर्हन्ति। संस्कृतभाषाया: कृत्स्नाधिगमाय सर्वेषां संस्कृतवर्णानां सम्यक् परिचय: स्यात्। तेन आदौ व्यवस्थितरूपेण वर्णोच्चारणशिक्षा व्यवहारेण, प्रायोगिकरीत्या क्रियात्मकरीत्या च बोधनीया:। तत: लोकभाषायां विद्यमानानां सरलसंस्कृतपदानां परिचयं कारयेत्। पश्चात् तेषां प्रयोग: संस्कृतभाषा रचनादृष्ट्या करणीय:। तेन झटिति सामान्यसंस्कृतस्य ज्ञानं भवति। यथा भाषाधिगमे वर्णपदवाक्यानां क्रमेण अधिगम: जायते, अपि च अधिगम: सुकरश्च भवति। तथैव संस्कृतं भाषाधिगमेऽपि वर्णपदवाक्यानां सम्यक् अधिगमे संस्कृतभाषाधिगगमो भवति। अभिप्रायस्तु वक्तृविवक्षाधीनो भवति। श्रोताऽपि प्रसङ्गमनुरुध्य वक्तृतात्पर्यानुसारम् अर्थम् अवगच्छति अभिजानाति च। अधिगमे कश्चन क्रम: भवति। वक्ता उच्चारितावर्णरूपदानां पदसमूहभूतानां वाक्यानां तत्तदर्थे निश्चितानां पदानां वाक्यानां वा ध्वनि: श्रोतु: कर्णविवरे आपतति। ध्वनिरूप: शब्द: वाक्यं वा बौद्धं स्फोटार्थं व्यञ्जयति तेन क्रमेण श्रोता तं तं वक्तृमनसि निहितम् अभिप्रायार्थमधिगच्छति। संस्कृतभाषाधिगम: सुकर: दुष्करश्च भवति। अत्र हेतु: भाषाया: सरलरचनायां सुकर:। एवं रचनायां जटिलायां सञ्जातायाम् अधिगम: दुष्कर: भवति।

**6.संस्कृतभाषाधिगमे मनोवैज्ञानिककारकाणि–**संस्कृतभाषाया: अभ्यासे सर्वेषामभिवृत्ति, अभिरुच्यादिषु मनोबैज्ञानिककारकाषु अपि आधुनिककाले परिवर्तनं सन्दृश्यते। इत्यत: यस्या: कस्या: अपि भाषाया: अधिगमे प्रधानकारकाणि काले काले परिवर्तितानि भवन्ति इति सुज्ञायते। वर्तमानकाले अतिमूल्ययुक्ताया: वैज्ञानिकविषयान्तर्गर्भिताया: संस्कृतभाषाया: परिपोषणे परिरक्षणे तस्या: शब्दभाण्डारस्य अभिज्ञानमत्यावश्यकं वर्तते। तादृश शब्दभाण्डारस्य अभिवृध्यै मनोवैज्ञानिककारकाणि अति महत्त्वपूर्णाणि भवन्ति।

अधिगन्तु: सम्पूर्णव्यक्तिविकासाय सर्वाङ्गीणविकासाय च शैक्षिककारकाणि सहोपकृतानि भवन्ति। आबाल्यात् प्रौढावस्था पर्यन्तं प्रत्येकं प्राथमिक-माध्यमिक-उच्चमाध्यमिक-उन्नतविद्यास्तरेषु तद्धत शैक्षिकसंस्थानामुद्देश्यानि, विधिविद्यान-प्रविधि-अभिवृत्ति-पाठ्यक्रमादय: अधिगन्तारं प्रभावयति। आधुनिकवर्तमानकाले शैक्षिकसंस्थासु सानुकूलप्रविध्यनुगुणविधानानि आगतानि। तथैव बाल्यवयसि एव भविष्यत्कालिकोद्योगावसरयुक्तपाठ्यप्रणाली विद्यार्थिनां स्वासक्त्यनुगुणं समनुष्ठीयते। वर्तमाने मूल्याङ्कनविधानं कुत्रचित् विद्यार्थिनाम् उद्विग्रतां जनयति। अत: मूल्याङ्कनविधानेऽपि आधुनिककाले विशिष्टानुसन्धानं क्रियते शौक्षिकानुसन्धानविद्भि:। शौक्षिकसंस्थासु गुरुशिष्यसम्बन्ध: यदा यथा पिता इव मित्रमिव भवति तदा तथा शिष्य: स्वीयभावान् सर्वानपि गुरवे निवेदयितुं प्रभवति। तद्वारा गुरुरपि शिष्याय विद्याधिगमे कीदृश: पन्था: प्रकल्पनीय इत्यपि ज्ञातुं प्रभवति। तथैव चतुर्विधकौशलक्रिया: स्तरानुगुणमभिवर्धनेन तदीयाधिगन्तु: ज्ञानं सुस्थिरं भवति।

भाषाधिगमे विशेषपूर्णशिक्षणाय मनोवैज्ञानिककारकाणं विशेषावधानं दातव्यम्। संस्कृतशब्दाधिगमस्य विकासे कानि कारकाणि प्रभावयन्तीत्यस्य अध्ययनमतीव महत्त्वपूर्णं भवति। अत्यधिकभारतीयच्छात्रा: विद्यालयेषु शिक्षणं स्वीयमातृभाषायां प्रादेशिकभाषायां वा कुर्वन्ति। तेषां कृते संस्कृतं श्रोतुं संस्कृतकक्ष्या एव एकं स्थानं भवति। संस्कृतकक्ष्याया: बहि: छात्र: प्रादेशिकभाषाया: सम्पर्के भवति। तत् कारणात् संस्कृतभाषाधिगमे संस्कृताध्यापकेन अतीव महत्त्वपूर्ण भूमिका निर्वोढव्या भवति। छात्रा: समुचितमार्गदर्शनं प्राप्तुम् अध्यापकमेव आश्रयन्ति। यदि संस्कृताध्यापक: कक्ष्यायाम् अमनोवैज्ञानिकरुपेण पाठयति तर्हि छात्रा: तेन किमपि न प्राप्नुवन्ति। अत: संस्कृताध्यापकेन कक्ष्यायामत्यधिकतया मनोवैज्ञानिकतानुगुणं प्रयोग: करणीय:। संस्कृतभाषाधिगमे प्रधानरुपेन मनोवैज्ञानिककारकाणि अध: प्रस्तुयते –

1. Motivation (अभिप्रेरणम्)
2. Attitude ( अभिवृत्ति:)
3. Intelligence ( बुद्धि)
4. Aptitude ( अभिक्षमता/ योग्यता)
5. Learning Styles (अधिगमशैली)
6. Personality ( व्यक्तित्व)
7. Self esteem (आत्मसम्प्रत्यय:)
8. Anxiety (उतकण्ठा /चिन्तनम्)
9. Attention (ध्यानम्)
10. Interest (अभिरुचि:)
11. Self Confidence (आत्मविश्वास:)
12. Cognition (संज्ञानम्)
13. Socialization (समाजीकरणं)
14. Believe (विश्वास:)
15. Empathy and Extroversion (सहानुभूति एवं वहिर्मुखता)
16. Inhibition and Risk Taking (नियन्त्रणं तथा विपत्तिनां ग्रहणम्)

यावदधिकं संस्कृताध्यापक: कक्ष्यायां मनोवैज्ञानिक रीत्या श्रावयति तावदधिकं छात्रमुखात् प्राप्तुं शक्नोति। विद्यालयस्य अनन्तरम् अधिगमस्य द्वितीयं स्थानं भवति गृहम्। पितर: अपि भाषाधिगमे प्रत्यक्षपरोक्षरुपेण स्वीययोगदानं दातुं शक्नुवन्ति। यदि पितर: शिक्षिता: भवन्ति तर्हि ते बालकानाम् अध्ययनस्य पर्यवेक्षणं कुर्वन्त: तेषां या: समस्या: सन्ति, तेषां समाधानं

कुर्वन्ति। यथा शब्दानामर्थविषये, उच्चारणविषये, कठिन–नूतनपदानां , प्रयोगसम्बद्धसमस्यानां विषये मार्गदर्शनं कुर्वन्ति। अत्रापि छात्रामां भाषाविकासे पित्रो: मनोवैज्ञानिककारकाणं अपि एकं कारकं भवति। उच्च मध्यस्तरीय सामाजिकार्थिकस्तरीय–बालकानां कृते दृश्यश्रव्यसामग्रीणाम् उपस्थापनं कुर्वन्ति। यथा – आकाशवानी, दूरदर्शनम्, ध्वनिमुद्रिकायन्त्रम् इत्यादय:। अत्र छात्रोत्साह: इत्यादि मनोवैज्ञानिकता प्रबलयति। यदि बालकानां पाठने मनोवैज्ञानिककारकाणाम् सफलोपयोग: सम्यक् नास्ति, तेषां बालका: शिक्षायां समुचितविकासं न प्राप्नुवन्ति। अत: स्वीयबालकानां कृते समुचिताध्ययनसामग्री अवश्यं करणीयमेव अध्यापकेन। यत: कक्ष्याशिक्षणेन सह अध्ययनसामग्र्य: अपि छात्राणां भाषाधिगमविकासं पुनर्बलयन्ति।

**परिशीलितग्रन्थसूची –**


1. शिक्षामनोविज्ञानम् – पि. नागमुनिरेड्डि – राष्ट्रियसंस्कृतविद्यापीठम्– 2011.
2. आधुनिकशिक्षामनोविज्ञानम् – डाँ. लोकमान्यमिश्र: – लखनऊ – 2011.
3. शिक्षाया: मनोवैज्ञानिकाधारा: – डाँ. वि. पद्ममित्रश्रीनिवास:– जयपुरत: – 2012.
4. भाषाशिक्षण तथा भाषाविज्ञान – डाँ. किशोरिलाल – 2015.